# shrIguruvandanam 1

# શ્રીગુરુવન્દનમ્ ૧

## Document Information

Text title : guruvandanam 1

File name : guruvandanam1.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Proofread by : NA

Description-comments : From bAlAsaparyA edited by S.V.Radhakrishnasastri

Acknowledge-Permission: Mahaperiaval Trust

Latest update : January 4, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીગુરુવન્દનમ્ ૧

શ્રીગણેશાય નમઃ ।

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુઃ ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુઃ સાક્ષાત્ પરં બ્રહ્મ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧॥

ધ્યાનમૂલં ગુરોર્મૂર્તિઃ પૂજામૂલં ગુરોઃ પદમ્ ।
મન્ત્રમૂલં ગુરોર્વાક્યં મોક્ષમૂલં ગુરોઃ કૃપા ॥ ૨॥

નિત્યાનન્દં પરમસુખદં કેવલં જ્ઞાનમૂર્તિં
ભાવાતીતં ગગનસદૃશં તત્ત્વમસ્યાદિલક્ષ્યમ્ ।
એકં નિત્યં વિમલમચલં સર્વધીસાક્ષિભૂતં
વિશ્વાતીતં ત્રિગુણરહિતં સદ્ગુરું તં નમામિ ॥ ૩॥

અજ્ઞાનતિમિરાન્ધસ્ય જ્ઞાનાઞ્જન શલાકયા ।
ચક્ષુરુન્મીલિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૪॥

ચૈતન્યં શાશ્વતં શાન્તં વ્યોમાતીતં નિરઞ્જનમ્ ।
નાદબિન્દુકલાતીતં તસ્મૈ શ્રીગુરવે નમઃ ॥ ૫॥

અખણ્ડમણ્ડલાકારં વ્યાપ્તં યેન ચરાચરમ્ ।
તત્પદં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬॥

સ્થાવરં જઙ્ગમં વ્યાપ્તં યત્કિઞ્ચિત્સચરાચરમ્ ।
તત્પદં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭॥

ચિન્મયં વ્યાપિતં સર્વં ત્રૈલોક્યં સચરાચ્રમ્ ।
અસિત્વં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૮॥

સચ્ચિદાનન્દરૂપાય વ્યાપિને પરમાત્મને ।
નમઃ શ્રીગુરુનાથાય પ્રકાશાનન્દમૂર્તયે ॥ ૯॥

જ્ઞાનશક્તિં સમારુહ્ય તત્ત્વમાલાવિભૂષિણે ।

ભુક્તિમુક્તિપ્રદાત્રે ચ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૦॥

અનેકજન્મસમ્પ્રાપ્ત કર્મધર્મવિદાહિને ।
જ્ઞાનાનલ્પ પ્રભાવેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૧॥

મન્નાથઃ શ્રીજગન્નાથો મદ્ગુરુઃ શ્રીજગદ્ગુરુઃ ।
સ્વાત્મૈવ સર્વભૂતાત્મા તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૨॥

ગુરુઃ શિવો ગુરુર્દેવો ગુરુર્બન્ધુઃ શરીરિણામ્ ।
ગુરુરાત્મા ગુરુર્જીવો ગુરોરન્યન્ન વિદ્યતે ॥ ૧૩॥

બ્રહ્માનન્દં પરમસુખદં યોગિનામપ્યગમ્યં
દ્વન્દ્વાતીતં ગગનસદૃશં તત્ત્વમસ્ત્યાદિલક્ષ્યમ્ ।
એકં નિત્યં વિમલમચલં સર્વધીસાક્ષીભૂતં
ભાવાતીતં ત્રિગુણરહિતં સદ્ગુરું તં નમામિ ॥ ૧૪॥

શ્રુતિસ્મૃતિપુરાણાનામાલયં કરુણાલયમ્ ।
નમામિ ભગવત્પાદં શઙ્કરં લોકશઙ્કરમ્ ॥ ૧૫॥

ગુરુર્ધામ્ના મહિમ્ના ચ શઙ્કરો યો વિરાજતે ।
તત્પદામ્ભોરુહરજઃ કણાયાસ્તુ નમો મમ ॥ ૧૬॥

ગુરવે સર્વલોકાનાં ભિષજે ભવરોગિણામ્ ।
નિધયે સર્વવિદ્યાનાં દક્ષિણામૂર્તયે નમઃ ॥ ૧૭॥

વન્દે ગુરુપદદ્વન્દ્વં અવાઙ્મનસગોચરમ્ ।
રક્તશુક્લ પ્રભામિશ્રં અતર્ક્યં ત્રૈપુરં મહઃ ॥ ૧૮॥

Proofread by NA

From Balasaparya edited by S.V.Radhakrishnasastri of Mahaperiaval Trust

This is a compilation from different sources.

---

*shrIguruvandanam 1*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*